# .. vakArAdi shrI vAmanAShTottarashatanAmastotram ..

## ॥ वकारादि श्रीवामनाष्टोत्तरशतनामस्तोत्रम् ॥

Document Information

Text title : vakArAdi vAmanAShTottarashatanAmastotram

File name : vakArAdivAmana108nAmastotram.itx

Category : aShTottarashatanAma

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ वकारादि श्रीवामनाष्टोत्तरशतनामस्तोत्रम् ॥

@@
श्री हयग्रीवाय नमः ।
हरिः ॐ

वामनो वारिजाताक्षो वर्णी वासवसोदरः ।
वासुदेवो वावदूको वालखिल्यसमो वरः ॥ १॥

वेदवादी विद्युदाभो वृतदण्डो वृषाकपिः ।
वारिवाहसितच्छत्रो वारिपूर्णकमण्डलुः ॥ २॥

वलक्षयज्ञोपवीतो वरकौपीनधारकः ।
विशुद्धमौञ्जीरशनो विधृतस्फाटिकस्रजः ॥ ३॥

वृतकृष्णाजिनकुशो विभूतिच्छन्नविग्रहः ।
वरभिक्षापात्रकक्षो वारिजारिमुखो वशी ॥ ४॥

वारिजाङ्घ्रिर्वृद्धसेवी वदनस्मितचन्द्रिकः ।
वल्गुभाषी विश्वचित्तधनस्तेयी विशिष्टधीः ॥ ५॥

वसन्तसदृशो वह्नि शुद्धाङ्गो विपुलप्रभः ।
विशारदो वेदमयो विद्वदर्धिजनावृतः ॥ ६॥

वितानपावनो विश्वविस्मयो विनयान्वितः ।
वन्दारुजनमन्दारो वैष्णवर्क्षविभूषणः ॥ ७॥

वामाक्षीमदनो विद्वन्नयनाम्बुजभास्करः ।
वारिजासनगौरीशवयस्यो वासवप्रियः ॥ ८॥

वैरोचनिमखालङ्कृद्वैरोचनिवनीवकः ।
वैरोचनियशस्सिन्धुचन्द्रमा वैरिबाडबः ॥ ९॥

वासवार्थस्वीकृतार्थिभावो वासितकैतवः ।
वैरोचनिकराम्भोजरससिक्तपदाम्बुजः ॥ १०॥

वैरोचनिकराब्धारापूरिताञ्जलिपङ्कजः ।
वियत्पतितमन्दारो विन्ध्यावलिकृतोत्सवः ॥ ११॥

वैषम्यनैर्घृण्यहीनो वैरोचनिकृतप्रियः ।
विदारितैककाव्याक्षो वांछिताङ्घ्रित्रयक्षितिः ॥ १२॥

वैरोचनिमहाभाग्य परिणामो विषादहृत् ।
वियद्दुन्दुभिनिर्घुष्टबलिवाक्यप्रहर्षितः ॥ १३॥

वैरोचनिमहापुण्याहार्यतुल्यविवर्धनः ।
विबुधद्वेषिसन्त्रासतुल्यवृद्धवपुर्विभुः ॥ १४॥

विश्वात्मा विक्रमक्रान्तलोको विबुधरञ्जनः ।
वसुधामण्डलव्यापिदिव्यैकचरणाम्बुजः ॥ १५॥

विधात्रण्डविनिर्भेदिद्वितीयचरणाम्बुजः ।
विग्रहस्थितलोकौघो वियद्गङ्गोदयाङ्घ्रिकः ॥ १६॥

वरायुधधरो वन्द्यो विलसद्भूरिभूषणः ।
विष्वक्सेनाद्युपवृतो विश्वमोहाब्जनिस्स्वनः ॥ १७॥

वास्तोष्पत्यादिदिक्पालबाहु र्विधुमयाशयः ।
विरोचनाक्षो वह्न्यास्यो विश्वहेत्वर्षिगुह्यकः ॥ १८॥

वार्धिकुक्षिर्वारिवाहकेशो वक्षस्थ्सलेन्दिरः ।
वायुनासो वेदकण्ठो वाक्छन्दा विधिचेतनः ॥ १९॥

वरुणस्थानरसनो विग्रहस्थचराचरः ।
विबुधर्षिगणप्राणो विबुधारिकटिस्थलः ॥ २०॥

विधिरुद्रादिविनुतो विरोचनसुतानन्दनः ।
वारितासुरसन्दोहो वार्धिगम्भीरमानसः ॥ २१॥

विरोचनपितृस्तोत्रकृतशान्तिर्वृषप्रियः ।
विन्ध्यावलिप्राणनाध भिक्षादायी वरप्रदः ॥ २२॥

वासवत्राकृतस्वर्गो वैरोचनिकृतातलः ।
वासवश्रीलतोपघ्नो वैरोचनिकृतादरः ॥ २३॥

विबुधद्रुसुमापाङ्गवारिताश्रितकश्मलः ।
वारिवाहोपमो वाणीभूषणोऽवतु वाक्पतिः ॥ २४॥

॥ इति वकारादि श्री वामनावताराष्टोत्तरशतम् पराभव
श्रावण बहुल प्रतिपदि लिखितं रामेण समर्पितं च
श्री हयग्रीवायदेवाय ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu

Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

.. vakArAdi shrI vAmanAShTottarashatanAmastotram ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*